हे ईश O Lord! त्वं Thou जगद्रक्षायै to protect the world नटसि dancest (परन्तु but) (तव Thy) पादाघातात् by the stroke of Thy feet मही the earth सहसा all of a sudden संशयपदं in a state of doubt व्रजति goes to भ्राम्यद्भुजपरिघरुग्णग्रहगणं by the forceful movement of Thy hands as if they are iron clubs, the planets are turned up and down विष्णोः पदं the abode of Viṣṇu, अन्तरिक्षलोक the spatial region , द्यौः heaven अनिभृतजटाताडिततटा the side being smitten by the waving of Thy loose matted hair, मुहुः again and again दौःस्थ्यं याति becomes miserable ननु ah विभुता mightiness वामा unfavourable एव indeed.

Translation (16):
O Lord! Thou dancest to protect the world (but) by the stroke of Thy feet the earth, and by the movements of Thy iron club-like hands the planets of the spatial region, i.e. the abode of Viṣṇu , all of a sudden, enter into a state of doubt as if it were the end to creation. By the smiting force of the waving of Thy loose matted hair on all sides, the heaven's condition becomes miserable. Ah, Thy mightiness itself appears harsh (while actually it is beneficial).

Note: The dance of Śiva starts at the end of the world (pralaya) to indicate that the new creation is to commence. It has specifically been stated in the Skanda Purāna Māheśvara Kaumārikākhaṇḍa, chapter 3, as cited in the Pañcamukhī commentary on the Mahimna stotra at page 64:

प्रलयाग्निशिखादग्धं पुनरुत्पद्यते जगत् ।
प्रकृष्टलयसंयुक्तं प्रलयं ताण्डवं विभोः ॥
क्षेत्रेषु धान्यलवनं शराणां मूलदाहनम् ।
बीजाङ्कुरादिवृद्ध्यर्थं जायते दृश्यते स्फुटम् ॥
ताण्डवाडम्बरस्तद्वत्प्रलयानलतापितान् ।
परमाणून्प्रकुरुते सृष्टियोग्यान् पुनः स्वयम् ॥
अतोऽस्य नर्तनं लोकरक्षायाः कारणं परम् ।
विचारणीयं विद्वद्भिः महामङ्गललक्षणम् ॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि–
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥

अन्वयः

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः यः वारां प्रवाहः (सः) ते शिरसि पृषतलघुदृष्टः (अस्ति) तेन जगत् जलधिवलयं द्वीपाकारं कृतम् इति अनेन एव तव दिव्यं धृतमहिम वपुः उन्नेयम् ।

Annotations:
वियद्व्यापी extending to sky तारागणगुणितफेनोद्गमरुचिः the lustre of whose foam is increased by the glimmering shadows of the starry heaven यः which वारां of water प्रवाहः current (सः that) ते शिरसि on Thy head पृषतलघुदृष्टः (अस्ति) appeared smaller like drops of water तेन by that (पुनः again) जगत् the world जलधिवलयं surrounded by water द्वीपाकारं looking like an island कृतम् made इति अनेन by this (symbol) एव alone तव Thy दिव्यं वपुः divine body धृतमहिम endowed with lordliness उन्नेयम् is to be inferred.

Translation (17):
The current of water (river Gaṅgā) which extends through the sky and the lustre of whose foam is increased by the glimmering shadow of the starry heaven, appears smaller like a drop of water on Thy head (with matted locks). The world has, again, been made to look like an island surrounded by that water. One must infer from this alone, that Thy divine body is endowed with Lordliness.

Note: It is traditionally known that when the waters of the seven seas were drunk by Agastya, they became empty and were again filled by the water of

Gaṅgā, brought to earth by Bhagīratha. The whole earth, surrounded by water became an island. From a part of this water on Thy head, different small parts were made into the Bhāgīrathī on earth, Mandākinī in the firmament and Bhogavatī in Pātāla (the nether land).
This is described in Skanda Purāṇa Māheśvara Kaumārikā khaṇḍa, chapter 3 / 17:
वियद्व्यापी सुरसरित्प्रवाहो विप्रुषाकृतिः।
बभूव यस्य शिरसि कस्तस्मात्परमो भवेत् ॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्राकौं रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि–
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥

अन्वयः
त्रिपुरतृणं दिधक्षोः ते रथः क्षोणी शतधृतिः यन्ता अगेन्द्रः धनुः अथो चन्द्राकौं रथाङ्गे रथचरणपाणिः शरः इति कः अयम् आडम्बरविधिः । खलु विधेयैः क्रीडन्त्यः प्रभुधियः परतन्त्राः न ।

Annotations:
त्रिपुरतृणं The three cities like straw दिधक्षोः desirous to burn ते Thy रथः क्षोणी the earth (become) chariot शतधृतिः Brahmā यन्ता charioteer (was made) अगेन्द्रः the

Lord of mountains, Meru धनुः bow (was) अथो and like this चन्द्रार्कौ the moon and the sun रथाङ्गे two wheels of the chariot रथचरणपाणिः the One who has a disc in his hand, Viṣṇu, शरः arrow इति in this way कः what अयम् this आडम्बरविधिः paraphernalia for such a trivial deed खलु indeed विधेयैः with things at disposal क्रीडन्त्यः playing प्रभुधियः the intellect of Lord परतन्त्राः dependent on others न not.

Translation (18):
What was the need of these paraphernalia when Thou didst desire to burn the three cities of the demons, which were to Thee like straw? Why didst Thou make the earth as chariot, Brahmā as charioteer, Meru, the lord of mountains, as bow, and like this, the moon and the sun as two wheels of that chariot and Viṣṇu, who has a disc in His hand, as an arrow? (That is, there was no need to employ these things for such a trivial work to be accomplished). Indeed the intellect of the Lord, while playing with the things at His disposal, is not dependent on others (the burning of the three cities was a playful fighting to the Lord).

Note: In the Skanda Purāṇa Māheśvara Kaumārikā-khaṇḍa, chapter 33 is mentioned:
क्षोणी रथो विधिर्यन्ता शरोऽहं मन्दरो धनुः ।

रथाङ्गे चापि चन्द्रार्कौ युद्धे यस्य च त्रैपुरे ॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो–
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

अन्वयः
हे त्रिपुरहर, हरिः ते पदयोः साहस्रं कमलबलिम् आधाय, तस्मिन् एकोने (सति), यत् निजं नेत्रकमलम् उदहरत् । असौ भक्त्युद्रेकः चक्रवपुषा परिणतिं गतः त्रयाणां जगतां रक्षायै जागर्ति ।

Annotations:
हे त्रिपुरहर O Destroyer of Tripura! हरिः Viṣṇu ते Thy पदयोः feet साहस्रं a thousand कमलबलिम् offering of lotuses आधाय giving तस्मिन् in that offering एकोने (सति) one being less यत् that निजं his own नेत्रकमलम् lotus eye उदहरत् rooted out असौ that भक्त्युद्रेकः exuberance of devotion चक्रवपुषा in the form of discus परिणतिं transformed (गतः was) त्रयाणां जगतां of the three worlds रक्षायै for protection जागर्ति is ever awake.

Translation (19):
O Destroyer of Tripura! When Viṣṇu was offering to Thy feet a thousand lotuses (to get His disc, then

he found) one being less (and to complete that) He rooted out one of His lotus eyes (to offer Thee). This exuberance of devotion was transformed into the form of a discus, i.e. Chakrasudarśana. (That Chakrasudarśana) is ever awake to protect the three worlds.

Note: The story of offering a lotus eye is mentioned in Skanda Purāṇa Māheśvarakhaṇḍa Aruṇācala-māhātmya, chapter 16:
एकोने पद्मसाहस्रे स्वनेत्रेण कृतार्चनम् ।
शूलिन् सुदर्शनं दत्वा दैत्यद्विषमतूतुषः ॥

क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥

अन्वयः
क्रतौ सुप्ते त्वं क्रतुमतां फलयोगे जाग्रत् असि । पुरुषाराधनम् ऋते प्रध्वस्तं कर्म क्व फलति ? अतः त्वां क्रतुषु फलदानप्रतिभुवं सम्प्रेक्ष्य जनः श्रुतौ श्रद्धां बद्ध्वा कर्मसु दृढपरिकरः (भवति) ।

Annotations:

क्रतौ सुप्ते sacrifice being ended and in dormant state क्रतुमतां to performers of sacrifices फलयोगे in rewarding fruits त्वं Thou जाग्रत् असि art awake, पुरुषाराधनम् ऋते without the sincere devotion to the Lord, प्रध्वस्तं कर्म the perished sacrifice क्व where फलति bears fruit? अतः therefore त्वां to Thee क्रतुषु in sacrifices फलदानप्रतिभुवं surety for bestowing result सम्प्रेक्ष्य deeming जनः the person श्रुतौ in Vedic preaching श्रद्धां बद्ध्वा affirming faith कर्मसु in sacrifices दृढपरिकरः resolute (भवति becomes).

Translation (20):
(O Lord!) Thou art awake in rewarding the fruit of the sacrifices to the performers even after their being perished; (because) without a sincere devotion to the Lord where does the destroyed sacrificial deed give result? Therefore, deeming Thee to be the surety in rewarding result, the person affirming faith in the preachings of the Vedas, becomes resolute in (performing) sacrifices.

Note: The sacrifice has been ordained to be the giver of heaven. Heaven is achieved after death. In the meantime the sacrificial activities remain in dormant state being completely perished. The question is raised as to how a destroyed deed can

bear fruit? The same fact has been discussed in this verse.
Madhusūdana Sarasvatī quotes कृतपरिकरः in stead of दृढपरिकरः

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता–
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

अन्वयः
हे शरणद, (यस्मिन् क्रतौ) क्रियादक्षः तनुभृताम् अधीशः दक्षः क्रतुपतिः, ऋषीणाम् आर्त्विज्यं, सुरगणाः सदस्याः, (तथापि) क्रतुफलविधान–व्यसनिनः त्वत्तः क्रतुभ्रंशः (अभूत्) ध्रुवं श्रद्धाविधुरं मखाः कर्तुः अभिचाराय हि ।

Annotations:
हे शरणद O Giver of shelter! (यस्मिन् क्रतौ in which sacrifice) क्रियादक्षः proficient in sacrificial rites तनुभृताम् having bodies (i.e.of beings) अधीशः Lord दक्षः Dakṣa by name क्रतुपतिः the sacrificer ऋषीणाम् of riṣis आर्त्विज्यं, priestly duty सुरगणाः gods सदस्याः supervisors (तथापि even then) क्रतुफलविधानव्यसनिनः prone to reward fruits of sacrifices त्वत्तः from Thee क्रतुभ्रंशः destruction of the

ṣacrifices (अभूत् was done) ध्रुवं certainly श्रद्धाविधुरं to one devoid of faith मखाः sacrifices कर्तुः of the sacrificer अभिचाराय for injury हि indeed.

Translation (21):
O Giver of shelter! The sacrifice – in which Dakṣa Prajāpati, the Lord of beings (and) a proficient in sacrificial rites, was the sacrificer, the sages were entrusted to perform the priestly duties and the gods were the supervisors (and invitees) – was destroyed by Thee, though Thou art prone to reward the fruits of sacrifices to the sacrificer. Truly, the sacrifices done by the sacrificer, devoid of faith, indeed, (become) an injury to him.

Note: Here, too, the poet alludes to the criticism of God who Himself destroys the sacrifice, and refutes it by saying that God visualises the intentions of the doer of any act.

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

अन्वयः

हे नाथ, रोहिद्भूतां स्वां दुहितरम् ऋष्यस्य वपुषा रिरमयिषुं प्रसभम् अभिकं गतं दिवं यातम् अपि अमुं प्रजानाथं सपत्राकृतं त्रसन्तं धनुष्पाणेः ते मृगव्याधरभसः अद्य अपि न त्यजति ।

Annotations:

हे नाथ O Lord! रोहिद्भूतां स्वां दुहिम्म् to his own daughter Saṃdhya, (being fascinated by her beauty) who had assumed the shape of a hind (due to shame or sin) प्रसभम् forceful swiftness रिरमयिषुं desirous to enjoy अभिकं गतं seized with carnal passion ऋष्यस्य वपुषा in the body of a stag दिवं यातम् अपि even after having gone to sky अमुं to this प्रजानाथं Lord of beings, i.e. Brahmā सपत्राकृतं deeming himself to be pierced by the arrow (feeling the pang) त्रसन्तं frightening धनुष्पाणेः ते of Thee, holding Thy bow (Pināka) in hand मृगव्याधरभसः the forceful swiftness of a hunter अद्य अपि even today न त्यजति does not leave (it shows Thy ever wakefulness to protect the world).

Translation (22):

O Lord! When Brahmā, desirous to enjoy his own daughter (Saṃdhyā) in carnal passion by force, took the form of a stag as she had assumed the shape of a hind (due to shame or sin) and chased her, Thou didst take up Thy bow (Pināka) with the forceful swiftness of a hunter and followed this Brahmā. The

force of that arrow does not leave Him, even today, in spite of his escape to the sky, in fear of being pierced by Thy arrow.

Note: One can see the star hunter (Ārdrā, i.e.Śiva) chasing the Deer constellation , i.e. Mṛigaśirā, running after Rohini in the firmament.
Madhusūdana Sarasvatī refers to the name Saṃdhyā, but no source is given. In Matsya Purāṇa the name is Sarasvatī, and the protection by Śiva is not mentioned: Purāṇic Encyclopaedia page 696.

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना–
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥

अन्वयः

हे पुरमथन, हे वरद, हे यमनिरत, स्वलावण्याशंसा धृतधनुषं पुष्पायुधं तृणवत् अह्नाय पुरः प्लुष्टं दृष्ट्वा अपि यदि देवी देहार्ध–घटनात् त्वां स्त्रैणम् अवैति, अद्धा युवतयः मुग्धाः बत ।

Annotations:
हे पुरमथन O Destroyer of Tripura! वरद the Giver of boons! यमनिरत one being engaged in yogic austerities

स्वलावण्याशंसा with the belief that the exquisite beauty of Pārvatī herself may be sufficient to break the meditation of the excellent yogi Rudra धृतधनुषं holding the bow पुष्पायुधं to Cupid, the flower-bowed god, तृणवत् like a piece of straw अह्नाय instantaneously पुरः before her eyes प्लुष्टं being burnt दृष्ट्वा having seen अपि even यदि if देवी the goddess देहार्धघटनात् Sharing half Thy body, i.e. androgynous form त्वां to Thee स्त्रैणम् uxorious अवैति considers बत Ah ! अद्धा Surely युवतयः young women मुग्धाः ignorant.

Note : लावण्य has been defined in Ujjavalanīlamaṇi as
मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥

Translation (23):
O Destroyer of Tripura and bestower of boons ! Seeing Thee engaged in yogic austerities, Cupid took up his bow, in the hope that the exquisite beauty of Pārvatī would break Thy samadhi, and aimed at Thee, but he was instantaneously burnt like straw before the eyes of Pārvatī. When she, sharing half Thy body (i.e. having androgynous form), considers Thee to be uxorious, ah ! then it seems true that young women are ignorant.

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा –
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ।।२४।।

अन्वयः
हे स्मरहर, श्मशानेषु आक्रीडा पिशाचाः सहचराः, चिताभस्म आलेपः, नृकरोटीपरिकरः स्रग् एवम् अपि तव अखिलं शीलम् अमङ्गल्यं भवतु नाम – तथापि हे वरद । स्मर्तृणां परमं मङ्गलम् असि ।

Annotations :
हे स्मरहर O Destroyer of Cupid ! वरद Giver of boons ! श्मशानेषु in the cremation ground आक्रीडा sport (playing) पिशाचाः ghosts सहचराः, companions चिताभस्म आलेपः, smearing the ashes of burning pyres on Thy body अपि and नृकरोटीपरिकरः the group of skulls of human beings स्रग् garland एवम् thus तव Thy अखिलं all शीलं conduct नाम in reality अमङ्गल्यं inauspicious भवतु is तथापि yet स्मर्तृणां to those who remember Thee परमं great मङ्गलं auspicious असि becomest.

Translation (24):
O Destroyer of Cupid ! and Giver of boons ! Thy sporting place is the cremation ground, Thy companions are the goblins, Thou smearest the

ashes of funeral pyers on Thy body (and) Thou bearest the garland of human skulls. Thus, all Thy conducts appear to be inauspicious, yet Thou art (the source) of great auspiciousness to those who remember Thee.

Note: It is said in the Śiva Purāṇa, Jñāna samhitā, chapter 14:

यद्यप्यमङ्गलानीह सेवते शङ्करः सदा ।
तथापि मङ्गलं तस्य स्मरणादेव जायते ॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२५॥

अन्वयः

प्रत्यक् मनः सविधं चित्ते अवधाय आत्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः यमिनः अमृतमये ह्रदे निमज्य इव यत् किमपि तत्त्वम् आलोक्य आह्लादम् अन्तः दधति तत् भवान् किल ।

Annotations:

प्रत्यक् मनः introvert minds (retracting from external objects and turning inward) सविधं as prescribed in the

scriptures चित्ते in the lotus heart अवधाय concentrating, आत्तमरुत: controlling the breath through Prāṇāyāma प्रहृष्यद्रोमाण: hair erect in glee प्रमदसलिलोत्सङ्गितदृश: eyes filled with joyous tears अमृतमये full of nectar ह्रदे in the lake यमिन: yogis निमज्य इव as if drowned यत् किमपि whatever, i.e. indescribable तत्त्वम् reality आलोक्य perceiving आह्लादम् bliss अन्त: दधति experiencing inwardly तत् that भवान् Thou art किल indeed.

Translation (25):

Thou art, indeed, that inexpressible Reality which the yogis perceive and experience as a blissful state in the very core of their heart, with introvert mind (retracting from external objects and) concentrating on the lotus of their heart, by controlling the breath through prāṇāyāma, following the method prescribed in the scriptures. (In that blissful state) their hair stand erect in glee and the eyes are filled with joyous tears, as if they are drowned in the lake of nectar.

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह –
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत् त्वं न भवसि ॥२६॥

अन्वयः

त्वम् अर्कः त्वं सोमः त्वं पवनः असि, त्वं हुतवहः, त्वम् आपः त्वं व्योम, त्वम् उ धरणिः त्वम् आत्मा, इति च एवं त्वयि परिणताः परिच्छिन्नां गिरं बिभ्रतु वयं तु इह तत् तत्त्वं न विद्मः यत् त्वं न भवसि ।

Annotations:

त्वम् असि Thou art अर्कः sun, त्वं Thou art सोमः moon, त्वं Thou art पवनः air त्वं Thou art हुतवहः fire त्वम् Thou art आपः water, त्वं Thou art व्योम space, त्वम् Thou art उ to indicate conjecture धरणिः earth, त्वम् Thou art आत्मा self, इति च and एवं thus परिणताः the learned one त्वयि regarding Thee परिच्छिन्नां limited गिरं opinion बिभ्रतु may hold वयं we तु but इह in this world त्वं Thou यत् which न not भवसि art तत् that तत्त्वं thing न विद्मः do not know.

Translation (26):

The learned people may thus hold limited opinions regarding Thee (Thy state): Thou art the sun, Thou art the moon, Thou art the air, Thou art the fire, Thou art the water, Thou art earth, and Thou art Soul (these are mere outward descriptions), but we know no object in this world which is not Thee.

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा–
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

अन्वयः

हे शरणद, त्रयीं तिस्रः वृत्तीः त्रिभुवनं अथो त्रीन् सुरान् अपि अकाराद्यैः त्रिभिः वर्णैः अभिदधत् (तथा च) तीर्णविकृति तुरीयं ते धांम अणुभिः ध्वनिभिः अवरुन्धानं ओम् इति पदं त्वां समस्तं व्यस्तं (चापि) गृणाति ।

Annotations:
हे शरणद O Giver of refuge! त्रयीं three Vedas (ऋच्, यजुः and सामन्) तिस्रः three वृत्तीः conditions (bodily states) त्रिभुवनं three worlds (भूः, भुवः , and स्वः) अथो and so अपि also त्रीन् सुरान् three gods (ब्रह्मा, विष्णुः and महेशः) अकाराद्यैः by अ (a) उ (u) and म् (m) त्रिभिः by three वर्णैः letters अभिदधत् express (तथा च and) तीर्णविकृति devoid of all impurities तुरीयं fourth i.e.transcendental ते Thy धाम glory अणुभिः ध्वनिभिः by half-syllable (subtle sound) अवरुन्धानं covered ओम् इति पदं this syllable Om समस्तं collectively व्यस्तं separately (चापि too) त्वां to Thee गृणाति states.

Translation (27):

In the word "OM", the separate letters A, U and M, indicate Thee in the triad of the three Vedas (Ṛig, Yaju and Sāma), three states or conditions of the conscious body (the waking, the dreaming and the deep sleep) or three sounds (Udatta, Anudatta and Svaritā), the three worlds (Bhūḥ, Bhuvaḥ and Svaḥ) and three gods (Brahmā, Viṣṇu and Maheśa). In the same way the mono-syllable "OM" collectively, denotes the non-dual and transcendental glory of Thy fourth form, which is devoid of all impurities and is expressible only by half-syllable (the most subtle and unpronounceable form - yet indicated by prolated 'plutā' sound). Thus the sound "OM", collectively as well as separately, reveals Thy form alone.

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां–
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२८॥

अन्वयः

हे देव, भवः शर्वः रुद्रः पशुपतिः अथ उग्रः तथा सहमहान् देवः (महादेवः) भीम–ईशानौ इति यद् इदम् अभिधानाष्टकम् अमुष्मिन्

प्रत्येकं श्रुतिः अपि प्रविचरति अस्मै भवते प्रियाय धाम्ने (अहं) प्रणिहितनमस्यः अस्मि ।

Annotations:
हे देव O Lord! भवः Bhava (the form of water), शर्वः Śarva (the form of earth), रुद्रः Rudra (the form of fire), पशुपतिः Paśupati (the form of sacrificer), अथ and, उग्रः Ugra (the form of air), सहमहान् देवः added with Mahā i.e. Mahādeva (the form of moon), तथा and भीम–ईशानौ Bhīma and Īśāna (the form of sky an sun), इति indicates the end of the list, यद् इदम् which this अभिधानाष्टकम् Thy eightfold names (octad) अमुष्मिन् in this श्रुतिः Vedas अपि too प्रत्येकं in each प्रविचरति moves अस्मै to such भवते Thee प्रियाय the beloved one धाम्ने to the effulgent seat (अहं) प्रणिहितनमस्यः अस्मि I bow down in salutation.

Translation (28):
O Lord! Bhava, Śarva, Rudra, Paśupati, Ugra, Mahādeva, Bhīma, and Īśāna, each of Thy eightfold names even the Vedas discuss (what to talk of other scriptures?). To Thy this beloved and effulgent seat, I bow down in salutation.

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमितिसर्वाय च नमः ॥२९॥

अन्वयः
हे प्रियदव, नेदिष्ठाय नमः दविष्ठाय च नमः। हे स्मरहर, क्षोदिष्ठाय नमः महिष्ठाय च नमः। हे त्रिनयन, वर्षिष्ठाय नमः यविष्ठाय च नमः । सर्वस्मै नमः , तद् इदम् इति ते सर्वाय च नमः ।

Annotations:
हे प्रियदव O Lover of forests! नेदिष्ठाय present nearby दविष्ठाय च and living far away नमः salutations of mine हे स्मरहर O Destroyer of Cupid! (god of love) क्षोदिष्ठाय to the smallest महिष्ठाय च and the largest one नमः my salutations हे त्रिनयन O Three-eyed One! वर्षिष्ठाय to the oldest नमः salutations यविष्ठाय च and also to the youngest नमः salutations सर्वस्मै च to all नमः salutations सर्वाय to one transcending all तद् इदम् this one ते to Thee इति so नमः salutation.

Translation (29):
O Lover of solitary forests! Salutations of mine to Thee whose presence is (felt) near at hand as well as far-far away. O Destroyer of Cupid! My salutations

to Thee who art the smallest (in form) as well as the largest one. O Three-eyed one! my salutations to Thee who art the oldest as well as the youngest one. My salutations to Thee who art in all (forms) and who doest stand transcending all forms also.

बह्लरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

अन्वयः

विश्वोत्पत्तौ बहलरजसे भवाय नमो नमः, तत्संहारे प्रबलतमसे हराय नमो नमः, जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः, प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ।

Annotations:
विश्वोत्पत्तौ for the creation of the universe बहलरजसे with the increase of रजस् among the three guṇas भवाय to Brahmā नमो नमः repeated salutations तत्संहारे for destruction of the universe प्रबलतमसे with the excess of तमोगुण (at the end of creation) हराय to Rudra नमो नमः salutations जनसुखकृते for giving pleasure to the people सत्त्वोद्रिक्तौ with the increase of सत्त्वगुण (to protect and sustain the world) मृडाय to Viṣṇu नमो नमः

salutations निस्त्रैगुण्ये to one beyond the three guṇas (attributes of Prakṛiti) प्रमहसि effulgent पदे object शिवाय to Śiva नमो नमः salutations.

Translation (30):
Salutations to Thee (in the form of) Brahmā the Creator in whom the Rajas attribute of Prakṛiti predominates at the time of creating the Universe. Salutation to Thee (as) Rudra in whom Tamas is predominant at the time of dissolution of the universe. Salutation to Thee in the form of Viṣṇu predominated by Sattva guṇa to give pleasure to the people (at the time of sustaining and maintaining the universe). (And apart from that) My salutation to Thee repeatedly in the form of Śiva, who is the effulgent one and is beyond the three guṇas as well.

Note: Bāṇa Bhatta describes this idea in Kādamharī as follows:
रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानाम्प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥

Hariṇī is the metre in this verse, its token being रसयुगहयैन्सौं भ्रौ म्लौ गो यदा हरिणी तदा ।

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

अन्वयः
हे वरद, क्व च इदं कृशपरिणति क्लेशवश्यं चेतः क्व च तव गुणसीमोल्लङ्घिनी शश्वद् ऋद्धिः इति चकितं माम् अमन्दीकृत्य ते चरणयोः भक्तिः (इदं) वाक्यपुष्पोपहारम् आधात् ।

Annotations:
हे वरद O Giver of boons! कृशपरिणति ill-developed and immature क्लेशवश्यं subject to affliction (misery) इदं चेतः this mind क्व च and where is तव Thy गुणसीमोल्लङ्घिनी of infinite virtue शश्वद् eternal ऋद्धिः glory क्व च and where इति because of this चकितं puzzled माम् to me अमन्दीकृत्य inspiring ते चरणयोः to Thy feet भक्तिः devotion (इदं this) वाक्यपुष्पोपहारम् present of verbal flowers in the form of this hymn आधात् has scattered.

Translation (31):
O Giver of boons! My ill-developed and immature mind, subject to affliction, when compared with Thy eternal glory and infinite virtue, seems extremely

puzzled, but my devotion inspires me to scatter these verbal flowers (in the form of this hymn) at Thy feet.

Note: It is like the surrender unto Viṣṇu: in Viṣṇu purāṇa 1/20/18:
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ।

The metre of ślokas 31 to 34, 37 and 38 is mālinī:
न–न–म–य–य–युतेयं मालिनी भोगिलोकैः as its token.

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

अन्वयः
सिन्धुपात्रे असितगिरिसमं कज्जलं स्यात्, सुरतरुवरशाखा लेखनी (स्यात्), उर्वी पत्रं (स्यात्) । यदि (एतानि) गृहीत्वा शारदा सर्वकालं लिखति तदपि हे ईश । तव गुणानां पारं न याति ।

Annotations:

हे ईश O Lord!! यदि if असितगिरिसमं like the black (Nilgiri) mountains कज्जलं ink सिन्धुपात्रे ocean be ink pot सुरतरुवरशाखा the branch of Kalpatara (the divine tree) लेखनी pen उर्वी the earth पत्रं leaf (piece of paper) स्यात् be शारदा the goddess of learning (एतानि these) गृहीत्वा taking सर्वकालं through eternity लिखति writes तदपि even then तव Thy गुणानां of virtues पारं the limit न not याति reaches.

Translation (32):
O Lord! If the ink be made of the black (Nilgiri) mountain, the ocean be the ink pot, the branch of (the divine) Kalpatru tree be the pen, the earth be the sheet of paper, and the goddess of Learning Saraswatī, taking all these things (herself) writes about Thee continuously through eternity, even then she cannot describe Thy virtues (which are unfathomable).(Then how can a person like me, Puṣpadanta, be able to describe Thee?)

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥

अन्वयः

सकलगणवरिष्ठः पुष्पदन्ताभिधानः असुरसुरमुनीन्द्रैः अर्चितस्य ग्रथितगुणमहिम्नः निर्गुणस्य इन्दुमौलेः ईश्वरस्य एतत् रुचिरं स्तोत्रम् अलघुवृत्तैः चकार ।

Annotations:

सकलगणवरिष्ठः the best among the Gaṇas (the attendants) of Lord Śiva, पुष्पदन्ताभिधानः Puṣpadanta by name असुरसुरमुनीन्द्रैः by Asuras, gods (divinities) and the best among the sages अर्चितस्य worshipped इन्दुमौलेः one having the crescent on his forehead ग्रथितगुणमहिम्नः whose glories have been sung निर्गुणस्य without attribute ईश्वरस्य of God, एतत् this रुचिरं beautiful स्तोत्रम् hymn अलघुवृत्तैः in a long metre (śikhariṇī) चकार composed.

Translation (33):

The best among the attendants of Lord Śiva, Puṣpadanta by name, composed this beautiful hymn in a long metre (śikhariṇī) on the glories of the attributeless Lord, who has a crescent moon on his forehead and who is worshipped by Asuras, gods and the best among the sages.

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ॥३४॥

अन्वयः

यः शुद्धचित्तः पुमान् अहरहरः धूर्जटेः एतत् अनवद्यं स्तोत्रं परमभक्त्या पठति सः शिवलोके रुद्रतुल्यः भवति, तथा अत्र प्रचुरतरधनायुः पुत्रवान् कीर्तिमान् च (भवति) ।

Annotations:
यः which पुमान् person शुद्धचित्तः with purified mind परमभक्त्या with extreme devotion अनवद्यं faultless or irreproachable धूर्जटेः स्तोत्रं the hymn to Lord Śiva एतत् this अहरहरः daily पठति recites सः he शिवलोके in the abode of Śiva रुद्रतुल्यः like Rudra भवति becomes तथा and अत्र here in this world प्रचुरतरधनायुः पुत्रवान् possessing sufficient wealth, long age and an unbroken (line of) progeny कीर्तिमान् famous च also (भवति becomes).

Translation (34):
The person who with purified mind and extreme devotion recites this irreproachable hymn of Lord Śiva daily, he will become (after death) like Rudra in the abode of Lord Śiva, and here, in this world, he

will possess abundant wealth, long life, an unbroken (line of) progeny and fame.

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥३५॥

अन्वयः

महेशात् अपरः देवः न, महिम्नः अपरा स्तुतिः न, अघोरात् अपरः मन्त्रः न, गुरोः परं तत्त्वं न अस्ति ।

Annotations:
महेशात् better than Śiva अपरः देवः another god न is not महिम्नः better than Mahimna अपरा other स्तुतिः prayer न is not अघोरात् better than Aghora अपरः other मन्त्रः Mantra (sacred formula) न is not गुरोः better than the preceptor (Guru) परं another तत्त्वं the reality to be had न अस्ति is not here.

Translation (35):
There is no other god better than Lord Śiva, there is no other prayer (composed to be recited) better than this Mahimna, there is no other mantra better than the Aghora (the sacred name of Lord Śiva, to repeat daily) (and) there is no other reality than a true Preceptor.

Note: In ślokas 35 and 36, and 40 to 43 the metre is anuṣṭubh.

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ।।।३६ ।।

अन्वयः
दीक्षा, दानं, तपः, तीर्थं, ज्ञानं, यागादिकाः क्रियाः (एते सर्वे) महिम्नस्तवपाठस्य षोडशीं कलां न अर्हन्ति ।

Annotations:
दीक्षा initiation दानं charity तपः austerities तीर्थं pilgrimages ज्ञानं knowledge of scriptures i.e.true knowledge यागादिकाः क्रियाः performing sacrificial offerings etc. (एते सर्वे all these together) महिम्नस्तवपाठस्य (of the merit obtained) by reciting the Mahimna (the glory of Śiva) षोडशीं कलां even one sixteenth part (of the merit obtained by reciting this Mahimna) न not अर्हन्ति are not equal to.

Translation (36):
Getting initiation, charity, austerities, pilgrimages, acquisition of the scriptural knowledge, and

performing of sacrificial offerings etc. (all these together) are not equal to even one sixteenth part of the merits achieved by reciting the eulogical hymn Mahimna of Lord Śiva.

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ॥३७॥

अन्वयः

कुसुमदशननामा सर्वगन्धर्वराजः शिशुशशिधरमौलेः देवदेवस्य दासः । सः खलु अस्य रोषात् निजमहिम्नः भ्रष्ट एव इदं दिव्यदिव्यं महिम्नः स्तवनम् अकार्षीद् ।

Annotations:

कुसुमदशननामा Puṣpadanta by name सर्वगन्धर्वराजः the Lord of all Gandharvas शिशुशशिधरमौलेः देवदेवस्य of the greatest among gods who keeps the crescent moon on His forehead दासः servant सः he खलु indeed अस्य of Śiva रोषात् एव from anger alone निजमहिम्नः from his glory भ्रष्ट fallen दिव्यदिव्यं the most sublime इदं this महिम्नः स्तवनं the prayer Mahimna अकार्षीद् composed.

Translation (37):

The Lord of all Gandharvas, Puṣpadanta by name, (and) the servant of the Supreme God who bears the Crescent moon on His forehead, indeed fallen from his glory, due to the anger of his Lord alone, composed this most sublime poem, Mahimna (to regain his favour).

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८॥

अन्वयः
यदि मनुष्यः प्राञ्जलिः नान्यचेताः सुरवरमुनिपूज्यं, स्वर्गमोक्षैकहेतुं, पुष्पदन्तप्रणीतम् इदम् अमोघं स्तवनं पठति, किन्नरैः स्तूयमानः शिवसमीपं व्रजति ।

Annotations:
यदि if मनुष्यः a person प्राञ्जलिः with folded palms नान्यचेताः having no other object in mind सुरवरमुनिपूज्यं adored by gods and great sages स्वर्गमोक्षैकहेतुं the means of getting Heaven and Liberation पुष्पदन्तप्रणीतं composed by Puṣpadanta इदम् this अमोघं unfailing स्तवनं the Psalm पठति recites किन्नरैः स्तूयमानः praised by Kinnaras शिवसमीपं near Lord Śiva व्रजति goes.

Translation (38):
One who recites this unfailing Psalm, composed by Puṣpadanta, adored by gods and great sages, (and) which is the means of getting Heaven and Emancipation, with folded palms and unfaltering mind (fixed on the Lord) reaches Śiva, praised by Kinnaras.

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥३९॥

अन्वयः
श्रीपुष्पदन्त–मुखपङ्कज–निर्गतेन हरप्रियेण किल्बिषहरेण स्तोत्रेण कण्ठस्थितेन समाहितेन, पठितेन भूतपतिः महेशः सुप्रीणितः भवति ।

Annotations:
श्रीपुष्पदन्त–मुखपङ्कज–निर्गतेन coming out from the lotus-like mouth of Puṣpadanta किल्बिषहरेण the destroyer of sins हरप्रियेण dear to Śiva स्तोत्रेण by the hymn कण्ठस्थितेन committed to memory पठितेन by recitations समाहितेन with concentrated mind भूतपतिः the lord of the beings

महेशः the Great Lord सुप्रीणितः extremely pleased भवति becomes.

Translation (39):
If one recites this hymn, coming out from the lotus-like mouth of Puṣpadanta, (composed) to destroy the sins, and dear to Lord Śiva, by committing it to memory, the Lord of the Beings, Śiva, becomes extremely pleased.

Note: The metre in this śloka is Vasantatilakā: उक्ता वसन्ततिलका त–भ–जा–ज–गौ–गः ।

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४०॥

अन्वयः
श्रीमच्छङ्करपादयोः एषा वाङ्मयी पूजा अर्पिता इति तेन सदाशिवः देवेशः मे प्रीयताम् ।

Annotations:
एषा This वाङ्मयी पूजा verbal worship श्रीमच्छङ्करपादयोः to the feet of Lord Śiva अर्पिता is offered इति तेन at this सदाशिवः ever propitious Śiva देवेशः the Lord of gods मे to me प्रीयताम् may be pleased.

Translation (40):
This verbal homage is offered to the feet of ever propitious Śiva. May the Lord of gods be pleased with me at this.

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥४१॥

अन्वयः
हे महेश्वर, तव तत्त्वं न जानामि । कीदृशः असि (इत्यपि न जानामि) हे महादेव, यादृशः असि तादृशाय नमो नमः ।

Annotations:
हे महेश्वर O Great Lord! तव Thy तत्त्वं the real nature of Thy being न जानामि I do not know कीदृशः of what sort असि Thou art (इत्यपि न जानामि this too, I do not know) महादेव O Great Śiva यादृशः of whatever nature असि Thou mayest be तादृशाय to that nature नमो नमः my repeated salutations.

Translation (41):
O Lord! I do not know Thy real nature. I also do not know of what sort Thou art in reality, (yet) of

whatever nature Thou mayest be, my repeated salutations are offered to That alone.

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥४२॥

अन्वयः

यः नरः एककालं द्विकालं त्रिकालं वा पठेत् (सः) सर्वपापैः विनिर्मुक्तः शिवलोके महीयते ।

Annotations:

यः whosoever नरः person एककालं once द्विकालं twice वा or त्रिकालं thrice पठेत् recites (सः he) सर्वपापैः विनिर्मुक्तः extricated from all sins शिवलोके in the region of Śiva महीयते is glorified.

Translation (42):

One, who recites this (Psalm) once, twice or thrice a day, is extricated from all the sins (and) is glorified in the region of Lord Śiva.

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥४३॥

अन्वयः
गन्धर्वभाषितम् इदम् ईश्वरवर्णनं स्तोत्रं पुण्यम् अनौपम्यं शिवम् मनोहारि आसमाप्तम् (च)।

Annotations:
गन्धर्वभाषितम् sung by Gandharva Puṣpadanta इदम् this ईश्वरवर्णनं the description of the majesty of the Lord स्तोत्रं hymn पुण्यम् meritorious अनौपम्यं unparalled मनोहारि charming आसमाप्तं completed fully (च) and शिवम् bestower of well-being.

Translation (43):
This unparalleled and meritorious hymn, bestower of well-being, a charming description of the glory of Lord Śiva, sung by Puṣpadanta, is completed fully.

Index to first lines